**अद्रीश** पु० अद्रीणाम् अद्रेर्वा ईशः ६त०। हिमाचले, शिवे च।

**अद्रुह्वन्** त्रि० द्रुह–क्वनिप् न०त०। द्रोहाकर्त्तरि–"ता वां सम्यगद्रुह्वाणेषमिति" ऋ० ५,७०,२, "हे अद्रुह्वाणा अद्रोग्धाराविति" भाष्यम्।

**अद्रोघ** त्रि० द्रुह–घञ् वेदे घत्वम् न०ब०। द्रोहरहिते "त्वं देहि सहस्रिणं रयिं नोऽद्रोघेणेति" ऋ०३,२२,६, "अद्रोघेण द्रोहरहितेनेति" भा०। न०त०। द्रोहाभावे पु०।

**अद्रोघावित** त्रि० अद्रोघः अवितो येन। अद्रोहरक्षके। "कृणुत धूमं वृषण सखायोऽद्रोघाविता" इति वेदः।

**अद्रोह** पु० अभावार्थे न०त०। द्रोहाभावे "अद्रोहोनाभिमानितेति" "अद्रोहः सर्वभूतानामिति" च पुरा०।

**अद्वय** न० न द्वयम्। द्वित्वाभावे। नास्ति द्वयं द्वित्वं तज्ज्ञानं वा यत्र। सर्वात्मतया आत्मनि ब्रह्मात्मैक्यज्ञे, अभेदे च। "अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानत" इति वे०सा०। ब्रह्म द्वयं पश्यत इति अद्वयं विज्ञानाभेदः पदार्थानामस्त्यत्र वादकत्वेन अस्त्यर्थे अच्। बौद्धभेदे ते हि "सहोपलम्भनियमादभेदो नीलतद्धियोरित्यनेन" पदार्थानां संविद्भिन्नत्वं वदन्ति विवरणं बौद्धशब्दे द्रष्टव्यम्।

**अद्वयवादिन्** पु० अद्वयं वदति सर्व्वमेव वस्तु चित्स्वरूपं नान्यदतो द्वितीयमस्तीति वदतीति वद–णिनि। अद्वैतवादिनि वैदान्तिके, वाह्यार्थाभावेन ज्ञानात्मकं सर्वं वस्तु स्वीकुर्वति बौद्धे च।

**अद्वयस्** त्रि० नास्ति द्वयं द्वित्वमस्य ब० योगविभागात् असिच् समा०। द्वित्वरहिते। "सखा सुशेवो अद्वया इति" ऋ० १,१८७,३, "अद्वया द्वयरहित" इति भाष्यम्।

**अद्वयानन्द** पु० नास्ति द्वयं द्वित्वं भेदः तज्ज्ञानं वा यस्य यत्र वा तादृश आनन्दः। ब्रह्मरूपानन्दे अद्वैतानन्दे। "अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानत इति" वे०सा०।

**अद्वयाविन्** त्रि०अद्वयमस्त्यर्थे विनि छन्दसि दीर्घः देवपितृयानरूपमार्गद्वयरहिते। "पुत्रस्य पाथः पदमद्वयाविन" इति ऋ० १,४ १५९, ३, अद्वयाविनः मार्गद्वयरहितस्येति भाष्यम्।

**अद्वयु** त्रि० द्वयं द्विप्रकारोऽस्त्यस्य बा० उ न०त०। द्विप्रकाररूपकापट्यशून्ये अन्तर्वाह्यैकरूपे "उप द्वयुम्वाद्वयुश्च वसव इति" ऋ०८, १८, १५।

**अद्वार** न० निन्दितं द्वारम्। प्रवेशानर्हे गुप्तद्वारे "अद्वारेण प्रवेशनमिति" "अद्वारेण न चातीयाद्ग्रामं वा वेश्म वा पुरमिति" च पुरा०। नास्ति द्वारमस्य ब०। प्रवेशायोग्ये दुष्प्रवेशे, अगम्ये अनुपाये च त्रि०।

**अद्वितीय** त्रि० द्विधा इतं भेदं गतम् द्वीतम् तस्य भावः द्वैतं तन्नास्ति यस्य ब०। सजातीयादिभेदशून्ये केवले परमात्मनि। वस्त्वद्वितीयमिति भा० "एकमेवाद्वितीयं ब्रह्मेति" श्रुतिः। "अत्र एकम्, एव, अद्वितीयमिति" पदत्रयेण ब्रह्मणि भेदत्रयराहित्यमुक्तम्। तथाहि भेदस्तावत् त्रिधा स्वगतभेदः सजातीयभेदः विजातीयभेदश्चेति। वृक्षादीनां स्वावयवशाखादिभ्यो भेदः स्वगतभेदः, घटात् घटान्तरस्य भेदः सजातीयभेदः, घटस्य पटादितो भेदः विजातीयभेदः। ब्रह्मणश्च "तदनन्यत्वमारम्भणशब्दादिभ्य" इति सूत्रेण स्वकार्य्यात् घटादितोऽनन्यत्वात् न स्वगतभेदः। घटादेर्व्यवहारिकसत्त्ववत्त्वेन पारमार्थिकसत्त्ववतो ब्रह्मणः विजातीयत्वेऽपि ततोऽभेदएव तद्भिन्नस्याभावात् "सर्वं खल्विदं ब्रह्मेति" श्रुत्यन्तरात् तत्सजातीयवस्त्वन्तराभावादेव तद्भेदः सिद्धएवेत्यादिकमाकरे दृश्यम्। द्वितीयशून्ये, असहचरे त्रि०।

**अद्विषेण्य** त्रि० द्वेष्टुं शीलमस्य, द्विष–एण्यन्–कित् न०त०। प्रियरूपे, "मयोभुरद्विषेण्यः सखेति" ऋ० १,१८७,३, अद्वेषिण्यः अद्वेष्यरसः प्रियरस इति भाष्यम्।

**अद्वेष** पु० न द्वेषः अभावार्थे न०त०। द्वेषाभावे। ब०। द्वेषरहिते त्रि०। "अद्वेषो हस्तयोर्दधे" इति ऋ० १, २४,४, "अद्वेषः द्वेषरहितः नास्ति द्वेषोऽस्येति" भाष्यम्। एतेन अद्वेषःशब्दे एतन्मन्त्रस्योदाहरणत्वेनोपन्यासः केषाञ्चित् भाष्यादर्शनमूलकः।

**अद्वेषस्** त्रि० द्विष–असुन् न०त०। द्वेषानाश्रये द्वेषाकर्त्तरि "अद्वेषो मरुतो गातुमेतनेति" ऋ० ५,८७,८, "अद्वेषः अद्वेषस" इति भाष्यम्।

**अद्वैत** न० द्विधा इतम् द्वीतं तस्य भावः द्वैतं भेदः अभावार्थे न०त०। अभेदे, "अद्वैतं सुखदुःखयोरनुगुणं सर्व्वास्ववस्थासु यदिति" उत्तरचरितम्। नास्ति द्वैतं भेदो यत्र। भेदरहिते त्रि० ब्रह्मणि न०। "अद्वैततत्त्व इव सत्यतरेऽपि लोक" इति नैषधम्।

**अद्वैतसिद्धि** पु० अद्वैतस्य जगतो ब्रह्माभेदस्य सिद्धिरत्र। स्वनामख्याते वेदान्तप्रकरणभेदे ६त०। तत्सिद्धौ स्त्री।

**अध** अव्य० अथ वेदे "सुपांसुलुगित्यादिना" वर्णव्यत्ययः। अथशब्दार्थे "अधा निवद्ध उत्तर" इति ऋ०४,१८,९, अधा "अथानन्तरमिति" भा०। अधापोषस्य पोषेणेति य० १२,८, अधेति अव्ययम् अथार्थे "निपातस्य चेति" पा० दीर्घ इति वेददीपः।